# Gayatri Upanishad

# ગાયત્ર્યુપનિષત્

## Document Information

Text title : Gayatri Upanishad

File name : gaayatryupanishhat.itx

Category : upanishhat, devii, gAyatrI, devI

Location : doc_upanishhat

Author : Rishi ?

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : [from Unpublished Upanishads - Adyar Library collection]

Latest update : Jan. 4, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# ગાયત્ર્યુપનિષત્

॥ ગાયત્ર્યુપનિષત્ ।

ૐ ભૂમિરન્તરિક્ષ દ્યૌરિત્યષ્ટાવક્ષરાણિ ।

અષ્ટાક્ષર હ વા એક ગાયત્ર્યૈ પદમેતદુ હાસ્યા
એતત્સ યાવદેતેષુ લોકેષુ તાવદ્ધ જયતિ ।

યોઽસ્યા એતદેવ પદ વેદ ઋચો યજૂષિ સામાનીત્યષ્ટાક્ષર
હ વા એક ગાયત્ર્યૈ પદમેતદુ હાસ્યા એતત્સ યાવતીય ત્રયી વિદ્યા
તાવદ્ધ જયતિ ।

યોઽસ્યા એતદેવ પદ વેદ પ્રાણોઽપાનો વ્યાન
ઇત્યષ્ટાવક્ષરાણ્યષ્ટાક્ષર હ વા એક
ગાયત્ર્યૈ પદમેતદુ હાસ્યા એતત્સ યાવદિદ
પ્રાણિતિ તાવદ્ધ જયતિ ।

યોઽસ્યા એતદેવ પદ વેદાથાસ્યા એતદેવ તુરીય
દર્શિત પદ પરોરજાય એષ તપતીતિ યદ્વૈ ચતુર્થ તત્તુરીય
દર્શિત પદમિતિ દદર્શ ઇવ હ્યેષ પરોરજા
ઇતિ સર્વમુ હ્યેષ રજ ઉપર્યુપરિ તપત્યેવ હ વા એષ
શ્રિયા યશસા તપતિ ।

યોઽસ્યા એતદેવ પદ વેદ સૈષા ગાયત્રી એતસ્મિસ્તુરીયે
દર્શિતે પદે  પરોરજસિ પ્રતિષ્ઠિતા તદ્વૈ તત્સત્યે પ્રતિષ્ઠિત
ચક્ષુર્હિ વૈ સત્ય તસ્માદ્યદિદાનીં દ્વૌ વિવદમાનાવેયાતા
અહમદ્રાક્ષમહમશ્રૌષમિતિ ।

ય એવ બ્રૂયાદહમદ્રાક્ષમિતિ તસ્યા એવ શ્રદ્દધ્યા
ય એતદ્વૈ તત્ સત્ય બલે પ્રતિષ્ઠિત તસ્માદાહુર્બલસત્યાદૌ
જોય એવ વૈષા ગાયત્ર્યધ્યાત્મ પ્રતિષ્ઠિતા સા હૈષા

ગાયસ્તતે પ્રાણા વૈ ગાયાસ્તાન્ પ્રાણાસ્તતે ઉદ્ગાયસ્તતે
તસ્માદ્ગાયત્રી નામ સ યાવેમામૂમત્વા હૈષૈવમાસ
યસ્મા ઇત્યાહ તસ્ય પ્રમાણ ત્રાયતે તા હૈકે સાવિત્રી-
મનુષ્ટુભમન્વાહુરનુષ્ટુભૈતદ્ગાચમનુબ્રૂમ
ઇતિ ન તથા કુર્યાદ્ગાયત્રીમેવાનુબ્રૂયાદ્યદિ હ વાપિ
બહ્વિવ પ્રતિગૃહ્ણાતિ ।

ઇહેવ તદ્ગાયત્ર્યા એકચન પદ પ્રતિ ય ઇમાસ્ત્રીન્ લોકાન્
પૂર્ણાન્ પ્રતિગૃહ્ણીયાત્ સોઽસ્યા એતત્પ્રથમપદમાપ્નુયાત્
અથ યાવતીય ત્રયી વિદ્યા યસ્તાવત્પ્રતિગૃહ્ણીયાત્ સોઽસ્યા
એતદ્વિતીયમાપ્નુયાત્ ।

અથ યાવદિદ પ્રાણિતિ યસ્યાવત્ પ્રતિગૃહ્ણીયાત્ ।

તસ્યા ઉપસ્થાન ગાયત્ર્યૈકપદી દ્વિપદી ત્રિપદીચતુષ્પદ્યપદા
સા ન હિ પદ્યઃ યસ્તે તુરીયાયપદાય
દર્શિતાય પરોરજસે સાવદોમિતિ સમધીયીતન હૈવાસ્મૈ
સકામ સમૃદ્ધ્યતે ।

યસ્મા એવમુપતિષ્ઠતે હ મદ પ્રાપમિતિ એતદ્ધવૈ તજ્જનકો
વૈદેહો વુરિલમાશ્રિતરાશ્વિમુવાચ ।

યત્તુ હોતર્ગા કથ હલીભૂતો વહસીતિ ।

મુખ હ્યસ્યા સસભ્રમ વિદાચકારેતિ હોવાચ તસ્યા
અગ્નિરેવ મુખ યદિહ વાપિ વહ્નિમાનગ્નાવભ્યાદધાતિ
સર્વમેતત્સ હત્યેવવિદ્યદ્યપવહ્નીવ પાપ કરોતિ
સર્વમેવૈતત્સમ્યગ્વિશુદ્ધો યતોઽજરોઽમરઃ સ ભવતીતિ ॥

ઇતિ ગાયત્ર્યુપનિષત્ સમાપ્તા ॥

*Gayatri Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*